**શિવપઞ્ચાક્ષર સ્તોત્રમ**

નાગેન્દ્રહારાય ત્રિલોચનાય

ભસ્માંગરાગાય મહેશ્વરાય |

નિત્યાય શુદ્ધાય દિગંબરાય

તસ્મૈ નકારાય નમઃ શિવાય ||*૧||

મન્દાકિનીસલિલચન્દનચર્ચિતાય

નન્દીશ્વરપ્રમથનાથમહેશ્વરાય |

મન્દાર મુખ્યબહુપુષ્પસુપૂજિતાય

તસ્મૈ મકારાય નમઃ શિવાય ||૨||

શિવાય ગૌરીવદનાબ્જવૃન્દ સૂર્યાય

દક્ષાધ્વર નાશકાય |

શ્રીનીલકણ્ઠાય વૃષધ્વજાય

તસ્મૈ શિકારાય નમઃ શિવાય ||૩||

વસિષ્ઠકુંભોદ્ભવગૌતમાર્યમુનીન્દ્રદેવાર્ચિતશેખરાય |

ચન્દ્રાર્ક વૈશ્વાનરલોચનાય તસ્મૈ વકારાય નમઃ શિવાય ||૪||

યક્ષસ્વરૂપાય જટાધરાય પિનાકહસ્તાય સનાતનાય |

દિવ્યાય દેવાય દિગંબરાય તસ્મૈ યકારાય નમઃ શિવાય ||૫||

પઞ્ચાક્ષરમિદં પુણ્યં યઃ પઠેચ્છિવસન્નિધૌ |

શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ||૬||

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં શિવપઞ્ચાક્ષરસ્તોત્રં સંપૂર્ણમ ||

(*૧-અસ્યાગ્રે 'આસમાપ્તં' ઇત્યાદિપ્રક્ષિપ્તશ્લોકાઃ ક્વચિદ્દ્રુશ્યન્તે |)

www.shaivam.org